# Skandakrita Shiva Stuti

# સ્કન્દકૃતા શિવસ્તુતિઃ

## Document Information

Text title : Skandakrita Shiva Stuti

File name : skandakRRitAshivastutiH4.itx

Category : shiva, stuti, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 1 | 204-234||

Latest update : March 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2024

*sanskritdocuments.org*

# સ્કન્દકૃતા શિવસ્તુતિઃ

દેવદેવ જગન્નાથ દેવદેવોત્તમ પ્રભો ।
વેદવેદાન્તવેદ્યેશ જગજ્જન્મૈકકારણ ॥ ૨૦૪॥

નિરામય નિરાધાર નિર્દ્વન્દ્વ નિરુપાધિક ।
નિષ્કલઙ્ક નિરાકાર વિકારરહિતાનઘ ॥ ૨૦૫॥

મહાદેવામરાધીશ વૃષાઙ્ક વૃષવાહન ।
વૃષભધ્વજ વિઘ્નેશ ત્રિપુરાન્તક શઙ્કર ॥ ૨૦૬॥

કાલકાલ કૃપાસિન્ધો શિતિકણ્ઠ શિવાપ્રિય ।
ત્રિકાગ્નિકાલ કાલાત્મન્ કાલાધાર પ્રવર્તક ॥ ૨૦૭॥

મનોન્મનામલાનન્ત વ્યોમકેશ જગત્પતે ।
ભૂતેશ ભૂતસઙ્ઘાત્મન્ ભૂતૈકનિલયામલ ॥ ૨૦૮॥

વિભૂતિભૂષણ શ્રીમન્ ભસ્મોદ્ધૂલિતવિગ્રહ ।
કૈલાસશિખરાવાસ કૃત્તિવાસ મહેશ્વર ॥ ૨૦૯॥

કપાલમાલાભરણ જરામરણવર્જિત ।
યોગિવૃન્દૈકમન્દાર વૃન્દારકગણાર્ચિત ॥ ૨૧૦॥

યોગિહૃત્પઙ્કજારૂઢનિરૂઢનિજવિગ્રહ ।
ગણ્ડમણ્ડલવિભ્રાજન્મણિકુણ્ડમણ્ડિત ॥ ૨૧૧॥

અનન્ત ચણ્ડમાર્તાણ્ડમણ્ડલાધિકસુપ્રભ ।
હિરણ્યબાહો વિશ્વાત્મન્ સંસારાર્ણવતારક ॥ ૨૧૨॥

વિશ્વતોમુખ સામાત્મન્ વિશ્વતશ્ચરણાજર ।
વિશ્વતોલોચનાનન્ત વ્યોમકેશ સદાશિવ ॥ ૨૧૩॥

જ્યેષ્ઠ શ્રેષ્ઠ સમસ્તાત્મન્ વ્યાપકાનન્તવિગ્રહ ।
ત્રિશૂલપાણે ખટ્વાઙ્ગિન્ નિઃસઙ્ગ નિગમાવ્યય ॥ ૨૧૪॥

નિરાશ્રયાખિલાધાર પરબ્રહ્મમયાવ્યય ।
બ્રહ્માનન્દૈકનિલય મયસ્કર નિરીશ્વર ॥ ૨૧૫॥

સત્ત્વપ્રધાન સત્ત્વાત્મન્નાનન્દમય સર્વગ ।
મહાશ્મશાનનિલય મહાપ્રેતાસનસ્થિર ॥ ૨૧૬॥

પિનાકપાણેઽદુષ્ટાત્મન્ શિષ્ટલોકૈકજીવન ।
શાર્દૂલચર્મવસન ભૂધરેશશરાસન ॥ ૨૧૭॥

સ્વેચ્છાકૃતાવનીધાજ(ચક્ર) દગ્ધત્રિપુરકાનન ।
વાસીકૃતાનન્દવન સોમસૂર્યાગ્નિલોચન ॥ ૨૧૮॥

મુનિચિત્તાસનાસીન કાલકૂટવિષાદન ।
કન્દર્પદર્પદમન વૃષાધીશૈકવાહન ॥ ૨૧૯॥

દુષ્ટારિસઙ્ઘશમન દુર્લઙ્ઘ્યદૃઢશાસન ।
અપ્રધૃષ્યાતિરોક્ષ્યા(હ્યા)ચ્છતેજઃપુઞ્જ નિરઞ્જન ॥ ૨૨૦॥

મહોદર મહાવીર મહાશૂર સુરેશ્વર ।
મહાધારાદ્ભુતાકાર સર્વલોકપ્રભાકર ॥ ૨૨૧॥

નમસ્તે નમસ્તે મહાદેવ શમ્ભો નમસ્તે નમસ્તે પ્રપન્નૈકબન્ધો ।
નમસ્તે નમસ્તે દયાસારસિન્ધો નમસ્તે નમસ્તે નમસ્તે મહેશ ॥ ૨૨૨॥

નમસ્તે નમસ્તે મહામૃત્યુહારિન્ નમસ્તે નમસ્તે મહાદુઃખહારિન્ ।
નમસ્તે નમસ્તે મહાપાપહારિન્ નમસ્તે નમસ્તે નમસ્તે મહેશ ॥ ૨૨૩॥

નમસ્તે નમસ્તે સદાચન્દ્રમૌલે નમસ્તે નમસ્તે સદાશૂલપાણે ।
નમસ્તે નમસ્તે સદોમૈકજાને નમસ્તે નમસ્તે નમસ્તે મહેશ ॥ ૨૨૪॥

યસ્ય સ્વરૂપં ન વિદુઃ સુરાસુરા યસ્ય સ્વરૂપં ન વિદુર્મુનીશ્વરાઃ ।
યસ્ય સ્વરૂપં ન વિદુર્યમેશ્વરાસ્તસ્યૈવ નિત્યં શિવરૂપમીડે ॥ ૨૨૫॥

યસ્ય સ્વરૂપં નિગમૈરગમ્યં તસ્યૈવ નિત્યં શિવરૂપમીડે ॥ ૨૨૬॥

સંસારદાવાનલશામકાય મૃત્યુઞ્જયાયામિતવિક્રમાય ।
સુરાસુરૌઘાર્ચિતપાદુકાય શિવાસમેતાય નમઃ શિવાય ॥ ૨૨૭॥

ઘોરાઽઽધિપાપૌઘનિવારકાય સ્વર્ગાપવર્ગાદિફલપ્રદાય ।
નિરામયાયાન્ધકસૂદનાય શિવાસમેતાય નમઃ શિવાય ॥ ૨૨૮॥

કુન્દેન્દુશઙ્ખસ્ફટિકોપમાય મહેશ્વરાયાશ્રિતવત્સલાય ।
શ્રીનીલકણ્ઠાય યમાન્તકાય શિવાસમેતાય નમઃ શિવાય ॥ ૨૨૯॥

ભુજઙ્ગચક્રાધિપભૂષણાય નાનામણિભ્રાજિતકુણ્ડલાય ।
કર્પૂરગૌરાય સુરોત્તમાય શિવાસમેતાય નમઃ શિવાય ॥ ૨૩૦॥

ત્રિકાગ્નિકાલાય મનોન્મનાય ત્રિયમ્બકાય ત્રિપુરાન્તકાય ।
કાલાગ્નિરુદ્રાય જગન્મયાય શિવાસમેતાય નમઃ શિવાય ॥ ૨૩૧॥

દયાસમુદ્રાય નિધીશ્વરાય ધનેશમિત્રાય સુધામયાય ।
કારુણ્યરૂપાય મયસ્કરાય શિવાસમેતાય નમઃ શિવાય ॥ ૨૩૨॥

બ્રહ્મેન્દ્રવિષ્ણ્વીશસુરાર્ચિતાય દેવાધિદેવાય દિગમ્બરાય ।
અનન્તકલ્યાણગુણાર્ણવાય શિવાસમેતાય નમઃ શિવાય ॥ ૨૩૩॥

વેદાન્તવેદ્યાય મહાદયાય કૈલાસવાસાય શિવાધવાય ।
શિવસ્વરૂપાય સદાશિવાય શિવાસમેતાય નમઃ શિવાય ॥ ૨૩૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે સ્કન્દકૃતા શિવસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧ । ૨૦૪-૨૩૪॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 1 . 204-234..

Proofread by Ruma Dewan

*Skandakrita Shiva Stuti*

pdf was typeset on March 8, 2024

Please send corrections to *sanskrit@cheerful.com*